<u>उपशास्त्री</u>

30.08.20
1

अथ पुनर्थिराजयोगकातिमाह —

तत्सम्बन्धिशुभानां च तथा पुनर संयुजाम् ।
शुभानां तु समत्वेन संयोगो योगकारिणाम् ॥

अन्वयः — तत्सम्बन्धिशुभानां भुक्तिषु तथा पुनः असंयुजां योगकारिणां शुभानां तु भुक्तिषु यदि संयोगः तदा समत्वेन तथा ।

संस्कृत — तत्सम्बन्धीति — तथा च तत्सम्बन्धि शुभानां (तत् तस्य राजयोगकारकग्रहाणां सम्बन्धिनः सहावस्थानादि सम्बन्धचतुष्टयान्तर्गतसम्बन्धविशिष्ट ये शुभग्रहास्तेषां) राजयोगकारक सम्बन्धिशुभग्रहाणां पुनः असंयुजां सम्बन्धरहितानां, योगकारिणां योग सम्पादयितॄणां, शुभानां शुभग्रहाणां तु संयोगः दशान्तर्दशा संयोगः समत्वेन फलं प्रयच्छन्तीति पूर्वश्लोकेन सम्बन्धः स्वमाशयः योगकारकग्रहाणां महादशासु तत् सम्बन्धि-शुभग्रहाणामन्तर्दशासु तथा योगकारकग्रहाणां महादशासु तदसम्बन्धिशुभग्रहाणामन्तर्दशासु मध्यम रूपेण फलं लभ्यते इति भावः ।

कौमुदी — उपरोक्त योगकारक की महादशा में शुभ के अन्तर्दशा आने पर राजयोग के फलों में और वृद्धि हो जाती है। परन्तु असम्बन्धी शुभ से योगकारक का समान भाव है अर्थात् योगकारक की महादशा में असम्बन्धी शुभ की अन्तर्दशा हो अथवा असम्बन्धी शुभ की महादशा में योगकारक की अन्तर्दशा हो, तो सामान्य शुभ से कुछ ही अधिक शुभफल होता है।

विमर्श - योगकारक जितने ग्रह हैं, उसके सम्बन्धी शुभ ग्रहों की अन्तर्दशा में राजयोग का फल मिलता है, जबकि राजयोग कारक ग्रहों से सम्बन्ध न रखने वाले ग्रहों की अन्तर्दशा में सामान्य फल ही होता है।

P.T.O

अथ शुभदशायां योगकारकाणां फलविशेषमाह –

शुभस्यास्य प्रसक्तस्य दशायां योगकारकाः।
स्वभुक्तिषु प्रयच्छन्ति कुत्रचिद्योगजं फलम्॥

अन्वयः – प्रसक्तस्य अस्य शुभस्य दशायां योगकारकाः स्वभुक्तिषु योगजं फलं कुत्रचित् प्रयच्छन्ति।

संस्कृत – शुभस्यास्येति – सम्बन्धविशिष्टस्य प्रसक्तस्य अस्य योगकारकस्य शुभस्य शुभग्रहस्य दशायां महादशायां योगकारकाः योगकारक ग्रहाः स्वभुक्तिषु निजान्तर्दशासु कुत्रचित् कदाचित् योगजं राजयोगसमुत्पन्नं फलं प्रयच्छति ददाति। अत्रायं योगो विद्यते यत् दशाधिपति सम्बन्धत्वेन तु शुभग्रहस्य अन्तर्दशायां योगजं फलं यथा सम्भवति तथैव फलं सम्बन्धरहित शुभग्रहाणामन्तर्दशायामपि सम्भवति।

क्षेमङ्करी – सम्बन्धी शुभ ग्रह की महादशा में योगकारक की अन्तर्दशा में कदाचित् कहीं कभी योगफल हो जाता है।

विमर्श – किसी भी शुभ ग्रह की महादशा में जब भी योगकारक ग्रह की अन्तर्दशा आती है, तब योगफल प्राप्त होने की सम्भावना अवश्य रहती है। व्यवहार में भी योगकारक ग्रह अपनी अन्तर्दशा कुछ में कुछ में शुभफल दे देते हैं।

डॉ० सुधीर कुमार
सहा० प्राध्यापक (ज्योतिष)
रा०उ०सं० महावि० सुखसेना,
पूर्णियाँ।

वस्तुनिष्ठप्रश्नाः
शास्त्री-I, II

30.08.20


(1) तेजोमुक्ता मुक्ता कुत्र?
उत्तरम्- पारशवदेशे।
(2) सूक्ष्मतमा मुक्ता कुत्र भवन्ति?
उत्तरम्- पाण्ड्यदेशे।
(3) जर्जरा मुक्ता कुत्र भवन्ति?
उत्तरम्- हिमदेशे।
(4) चन्द्रकान्तायाः मुक्तायाः देवता कः?
उत्तरम्- इन्द्रः।
(5) हरितालतुल्यायाः मुक्तायाः देवता कः?
उत्तरम्- वरुणः।
(6) कृष्णवर्णायाः मुक्तायाः को देवः?
उत्तरम्- यमः।
(7) रक्तवर्णायाः मुक्तायाः को देवः?
उत्तरम्- वायुः।
(8) कमलवर्णायाः मुक्तायाः देवता कः?
उत्तरम्- अग्निः।
(9) धूमरहितवह्निवर्णायाः मुक्ताया को देवता?
उत्तरम्- अग्निः।
(10) सार्धतिस्रगुञ्जापरिमितायाः मुक्ताया ~~को देवता~~ मूल्यं भवति
उत्तरम्- ~~[illegible]~~ सप्ततिकार्षापणः।
(11) तिस्रगुञ्जापरिमितायाः मुक्तायाः मूल्यं भवति —
उत्तरम्- पञ्चाशत्।
(12) ज्योत्स्नामुक्तायाः मूल्यं भवति——
उत्तरम्- द्विशतं रूप्यकाणि।

डॉ० खुदिराम कुमार
सहा०आचार्य (ज्योतिष)
रा०उ०सं०महावि० सुखसेन
पूर्णियाँ।